## नपुंसके भावे क्तः । (११४/३०९०)

नपुंसकलिङ्गे भावे [1]धातोः क्तः प्रत्ययो भवति । [2]हसितम् । सहितम् । जल्पितम् ॥

## ल्युट् च । (११५/३२९०)

नपुंसकलिङ्गे भावे धातोः ल्युट् प्रत्ययो भवति । हसनं छात्रस्य । [3]शोभनम् । जल्पनम् । शयनम् । आसनम् । योगविभाग उत्तरार्थः ॥

## कर्मणि च येन संस्पर्शात् कर्तुः शरीरसुखम् । (११६/३२९१)

येन कर्मणा संस्पृश्यमानस्य कर्तुः शरीरसुखमुत्पद्यते, तस्मिन् कर्मणि उपपदे धातोः नपुंसकलिङ्गे भावे ल्युट् प्रत्ययो भवति । पूर्वेणैव सिद्धे प्रत्यये नित्यसमासार्थं वचनम् । उपपदसमासो हि नित्यः समासः । पयःपानं सुखम् । ओदनभोजनं सुखम् । कर्मणि इति किम् ? तूलिकाया उत्थानं सुखम् । संस्पर्शात् इति किम् ? अग्निकुण्डस्य उपासनं सुखम् । कर्तुः इति किम् ? गुरोः स्नापनं सुखम् । स्नापयतेः न गुरुः कर्ता, किं तर्हि, कर्म । शरीरग्रहणं किम् ? [4]पुत्रस्य परिष्वजनं सुखम् । सुखं मानसी प्रीतिः । सुखमिति किम् ? कण्टकानां [5]मर्दनं दुःखम् । सर्वत्रासमासः प्रत्युदाह्रियते ॥

## करणाधिकरणयोश्च । (११७/३२९३)

करणेऽधिकरणे च कारके [6]धातोः ल्युट् प्रत्ययो भवति । [7]इध्मप्रव्रश्चनः । पलाशशातनः । अधिकरणे – गोदोहनी । सक्तुधानी ॥

## पुंसि सञ्ज्ञायां घः प्रायेण । (११८/३२९६)

करणाधिकरणयोः [8]इत्येव । पुंलिङ्गयोः [9]करणाधिकरणयोरभिधेययोः धातोः घः [10]प्रत्ययो भवति समुदायेन चेत् [11]सञ्ज्ञा गम्यते । प्रायग्रहणमकात्स्न्यार्थम् । दन्तच्छदः[12] । उरश्छदः [13]पटः । अधिकरणे खल्वपि – एत्य तस्मिन् कुर्वन्ति इति आकरः । आलयः । पुंसि इति किम् ? प्रसाधनम्[14] । सञ्ज्ञायाम् इति किम् ? प्रहरणो दण्डः । घकारः 'छादेर्घेऽद्व्युपसर्गस्य' (६.४.९६/३२९७) इति विशेषणार्थः ॥

---

1. धातोः नास्ति ब. फ. 2. छात्रस्य शोभनम् अ. ब. क. ड. ह, शयितम् भुक्तम् आसितम् ब. ड. फ. ह. 3. शोभनम् नास्ति फ, भोजनम् ड, भुक्तम् क. 4. प्रपुत्रस्य ह. 5. संमर्दनम् ह. 6. अभिधेये इत्यधिकम् ब. क. ड. फ. 7. इध्मव्रश्चनः ड. 8. एव फ. 9. करणाधिकरणयोः नास्ति फ. 10. प्रत्ययः नास्ति फ. 11. सञ्ज्ञा या ह. 12. अधरः इत्याधिकम् फ, दन्तच्छदौ ओष्ठौ इत्यधिकम् ह. 13. प्लवः क, घटः अ. 14. व्याकरणम् इत्यधिकम् ग. फ.